# ।। संस्कृतप्रभातम् ।।

## प्रार्थना

कृष्ण ! देव ! भवन्तं वन्दे ।

मन-मानस-मधुकरम् अर्पया निज-पद-पङ्कज-मकरन्दे ॥

हे कृष्ण ! हे देव ! अहं भवन्तं वन्दे । मम मन:मधुकरस्य इव अस्ति तथा भवत: चरणयो: अमृतम् मकरन्दस्य इव मधूर: अस्ति कृपया एनम् भ्रमरं भवत: चरणयो: अनुरागं ददातु ।

## संपादकीयम्

एतस्मिन् मासे वयं आषाढी एकादशी उत्सवस्य अनुभवं कृतवन्त: अथ तस्य विषये लिखाम: । **‘ततो निवृत्त: आयात: पश्यन्भीमरथी तटे । द्विभुजं विठ्ठलं विष्णुं भुक्तिमुक्ति प्रदायकम् ॥’** भीमरथी नद्या: तटे द्विकरौ कट्यां स्थापयित्वा श्रीविठ्ठल इच्छापूर्ती च मोक्षं प्रदानार्थ तिष्ठति । एतस्य महति पद्मपुराणे अस्ति । अन्यश्लोके **‘क्षेत्रेषु तीर्थेष्वथ दैवतेषु सर्वेष्विट वै गरिष्टम् । श्रीपुण्डरीकं किल चन्द्रभागा श्रीविठ्ठलस्तं मुनिपुण्डलिक:॥’** परमं क्षेत्रं पुण्डरीक क्षेत्रं । परमं दैवतं श्रीविठ्ल । परमं तीर्थ चन्द्रभागा च परम: भक्त: पुण्डलिक अस्ति । एकस्मिन् अन्ये श्लोके एकादश्या: माहात्म्यं अस्ति । **‘आषाढ शुक्लैकादश्यामुपोष्य हरिमर्चयते । पाण्डुरंगे स्थितं देवं य: स मुक्तिमवाप्नुयात् ॥ कार्तिके तु सिते पक्षे एकादश्या: विशेषत: । पुजयत् गोपवेषं तं पाण्डुरंगे स्थितं हरिम् ॥’** विशेषत: ये जना: आषाढ शुक्ल च कार्तिक शुक्ल एकादश्यां उपवासं कृत्वा पाण्डुरंगस्य अर्चनं कुर्वन्ति ते मुक्तिं प्राप्नुवन्ति । एतस्मिन् दिने श्रीविठ्ठल तस्य: ऐश्वर्यभावं त्यक्त्वा मूलरूपं स्वीकरोति । नन्दनन्दन यशोदानन्दन गोपाल रूपं धृत्वा भक्तै: सह वृन्दावनभावे लीलां कृर्तुम् इच्छति । तर्हि लक्षा: भक्ता: तीव्रया इच्छया पण्ढरपुर नगरं आगच्छन्ति । एतस्मिन् उत्सवे देहू आळंदी तथा च अन्य ग्रामत: पण्ढरपुरपर्यतं भक्ता: नृत्यं संकीर्तनं गायनं च कुर्वन्ति । एतत् दिण्डी इति नाम्ना विख्यात:। अन्ये बहव: जना: विविधयानै आगच्छन्ति । एतस्मिन् उत्सवे एतस्मिन् वर्षे १४ लक्ष जना: आगतवन्ता:। अस्माकं वैदिकेषु शास्त्रेषु पुराणेषु च धाम्नाम् विपूलं माहात्म्यम् अस्ति । किन्तु बहुनि शास्त्रानि संस्कृते एव उपलब्धानि तेषाम् अन्यां भाषायां अनुवाद: नास्ति । अत: अस्माकं संस्कृताध्ययनं आवश्यकम् । यदि वयं संस्कृते निपुण: भविष्याम: तर्हि वयं एतेषां शास्त्रानाम् अनुवादं कर्तुं शक्नुम:।

## संभाषण्




## कथा स्वामिभक्ति:

रामायणस्य काल: । राम: रावणं हतवान् । सीतया सह अयोध्याम् आगतवान् च । रामस्य राज्यभिषेकसमय: । सर्वत्र सन्तोष: । तदानीं सर्वेभ्य: पारितोषिकाणि दत्तानि । भटा: बहव: आसन् । एकैक: अपि पारितोषकं प्राप्तवान् ।

आञ्जयास्य पर्याय: आगत: । आञ्जनेय: रामसमीपम् आगतवान् । रामस्य पार्श्वे सीता आसीत् किल् । सा स्वकीयं कण्ठहारम् आञ्जयाय दत्तवती । आञ्जनेय: हारं स्वीकृत्य बहि: आगतवान् । एकं वृक्षम् आरुह्य उपविष्टवान् ।

कण्ठहारस्य एकं मणिं स्वीकृतवान् । दन्तेन दष्टवान् । तं मणिम् अधः क्षिप्तवान । अन्य मणिं स्वीकृतवान् । दन्तेन पुनः दष्टवान् । तं मणिं अपि अधः क्षिप्तवान् । एवम् एकैकशः मणिम् अधः क्षिप्तवान् सः । तत्र एकः नागरिकः आगतः । नागरिकः एतत् सर्वं दृष्ट्वा आञ्जनेयं पृष्टवान् इदम् किं करोति भवान् इति । 'मणिपरीक्षां करोमि' इति आञ्जनेयः उक्तवान् । किम् इति परीक्षा करोति । इति नागरिकः पृष्टवान् । ' श्रीराम मणिषु अस्ति वा इति परीक्षां करोमि' इति आञ्जनेयःउक्तवान् । 'एवं किमर्थम्' इति नागरिकः पृष्टवान् । 'यत्र श्रीराम नास्ति तेन मणिना मम किं प्रयोजनम् । सर्वे मणयः परीक्षिताः । एकस्मिन् अपि मणौ श्रीरामः नास्ति । अतः मणीन् क्षिपामि' इति आञ्जनेयः उक्तवान् । 'सर्वत्र श्रीरामस्य अन्वेषणं करोति किल भवान भवताः शरीरे श्रीराम अस्ति किम्' इति नागरिकः पृष्टवान् । 'कुतः नास्ति पश्यतु तावत् ' इति आञ्जनेयःउक्त्वा स्वस्य उरसः भेदनं कृतवान् । आञ्जनेयस्य हृदये श्रीरामः सीतया सह हसन् अस्ति । तस्मिन् समये श्रीरामः आर्विभूतः । 'भवतः अभिमानेन तुष्टः अस्मि । चिरं जीवतु' इति सः आञ्जनेयम् आशिषा अनुगृहीतवान् ।

## काव्यविनोदः



पूर्व पदरञ्जन्याः
उत्तरम

| | | | | | |
|---|---|---|---|---|---|
| ■ | १ त | डा | ग | ■ | ८ अ |
| २ प | क्ष | ■ | ■ | ७ न | भ |
| रि | क | ■ | ६ प्र | ■ | द्र |
| त्रा | ■ | ४मो | ह | न | ■ |
| णा | ■ | ५हि | र | ण | म् |
| ३ य | व | नी | ■ | ९मा | ■ |

नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः । शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ॥

## पदरञ्जनी

दिगंतसम शब्द -१. मानवः/व्यक्ति २.सा गौमाता सर्व इच्छा पूर्ण करोति। ४. अन्तिम/दुरतम् ५. क्षेत्र/देश ७. इंद्रस्य वाहनम् ९. अन्य/भिन्न/द्वितीय १०. गुलिका/ औषधी

ऊर्ध्व शब्द - १.राजा २. कन्दर्पः ३. प्रशंसा/संस्तुति ६. प्रथम त्रिणि अंकानी संख्यायाः ७.शर्करा/लवनसादर्श मधूरः अन्न ८. नारायणस्य नाम गायन्ति सः ९. दुग्धः

| | | | | | |
|---|---|---|---|---|---|
| १ | ■ | २ | | | ३ |
| ४ | | | ■ | ■ | |
| ■ | ५ | | ६ | : | ■ |
| ७ | | | | ■ | ८ |
| | ■ | ■ | ■ | ९ | |
| १० | | | ■ | | |

## चिन्तनीयम्

केशवम्पतितं दृष्ट्वा पाण्डवाः हर्ष निर्भराः । रुदन्ति कौरवाः सर्वे हा हा केशव ॥

अनुवाद- कृपया भवान/भवती लिखतु.......................................................................................... ।

## सुभाषितम्

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे । सज्जना न हि सर्वत्र चन्दनं न वने वने ॥

सर्वेषु पर्वतेषु माणिक्यं न भवति सर्वेषु गजेषु मौक्तिकं न भवति । सज्जनाः सर्वत्र न भवन्ति । सर्वेषु वनेषु चन्दनवृक्षाः न भवति ॥

प्रकाशनं मुद्रणं च संकेत- धीरशांत दासः, कनाई कृष्ण दासः,पाक्षिकः संस्कृतप्रभातम्, हरे कृष्ण चौक, ५० गोकुलनगरे कोंढवा - पुणे-४८ अणुपत्रम् संकेत sanskritprabhatam@gmail.com. d16108@gmail.com, भ्र.ध्व.-८८८८८४४६४८/९४२३२३४४३ 